# .. Sri Renuka Ashtottarashatanama Stotram ..

# ॥ શ્રીરેણુકા અષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

## Document Information

Text title : reNukA aShTottarashatanAma stotram
File name : reNukA108nAmastotra.itx
Category : aShTottarashatanAma
Location : doc_devii
Author : shANDilyamaharShi
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Kaushal S. Kaloo kaushalskaloo at gmail.com
Proofread by : Kaushal S. Kaloo kaushalskaloo at gmail.com, NA
Description-comments : from shrIreNukAtantram, Pitambarapeeth, Datia
Latest update : May 11, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ શ્રીરેણુકા અષ્ટોત્તરશતનામસ્તોત્રમ્ ॥

॥ શ્રી ગણેશાય નમઃ ॥

॥ શ્રી ભગવત્યૈ રેણુકાજગદમ્બાયૈ નમોનમઃ ॥

ૐ અસ્ય શ્રી રેણુકા દેવ્યષ્ટોત્તરશત નામાવલિસ્તોત્રમહામન્ત્રસ્ય
શાણ્ડિલ્ય મહર્ષિઃ અનુષ્ટુપ્ છન્દઃ શ્રીજગદમ્બા રેણુકા દેવતા
ૐ બીજં નમઃ શક્તિઃ ૐ મહાદેવીતિ કીલકં
શ્રી જગદમ્બા રેણુકા પ્રસાદસિદ્ધ્યર્થે
સર્વં પાપક્ષય દ્વારા શ્રીજગદમ્બારેણુકાપ્રીત્યર્થે
સર્વાભીષ્ટ ફલ પ્રાપ્ત્યર્થે ચ જપે વિનિયોગઃ ।

અથ કરન્યાસઃ
ૐ હ્રાં રેણુકાયૈ નમઃ અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ હ્રીં રામમાત્રે નમઃ તર્જનીભ્યાં નમઃ ।
ૐ હ્રૂં મહાપુરુષવાસિન્યૈ નમઃ મધ્યમાભ્યાં નમઃ ।
ૐ હ્રૈં એકવીરાયૈ નમઃ અનામિકાભ્યાં નમઃ ।
ૐ હ્રૌં કાલરાત્ર્યૈ નમઃ કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ હ્રઃ એકકાલ્યૈ નમઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

અથ ષડઙ્ગન્યાસઃ
ૐ હ્રાં રેણુકાયૈ નમઃ હૃદયાય નમઃ ।
ૐ હ્રીં રામમાત્રે નમઃ શિરસે સ્વાહા ।
ૐ હ્રૂં મહાપુરુષવાસિન્યૈ નમઃ શિખાયૈ વષટ્ ।
ૐ હ્રૈં એકવીરાયૈ નમઃ કવચાય હું ।
ૐ હ્રૌં કાલરાત્ર્યૈ નમઃ નેત્રત્રયાય વૌષટ્ ।
ૐ હ્રઃ એકકાલ્યૈ નમઃ અસ્ત્રાય ફટ્ ।

અથ દેહન્યાસઃ
ૐ હ્રાં રેણુકાયૈ નમઃ શિરસે સ્વાહા ।
ૐ હ્રીં રામમાત્રે નમઃ મુખે ।
ૐ હ્રૂં મહાપુરુષવાસિન્યૈ નમઃ હૃદયે ।
ૐ હ્રૈં એકવીરાયૈ નમઃ ગુહ્યે ।
ૐ હ્રૌં કાલરાત્ર્યૈ નમઃ પાદયોઃ ।
ૐ હ્રઃ એકકાલ્યૈ નમઃ સર્વાઙ્ગે ।

ૐ ભૂર્ભુવઃ સ્વઃ ઇતિ દિગ્બન્ધઃ ।

ધ્યાનમ્
ધ્યાયેન્નિત્યમપૂર્વવેશલલિતાં કન્દર્પ લાવણ્યદાં
દેવીં દેવગણૈરુપાસ્યચરણાં કારુણ્યરત્નાકરામ્ ॥
લીલાવિગ્રહણીં વિરાજિતભુજાં સચ્ચન્દ્રહાસાદિભિર્-
ભક્તાનન્દવિધાયિનીં પ્રમુદિતાં નિત્યોત્સવાં રેણુકામ્ ॥

ૐ
જગદમ્બા જગદ્વન્દ્યા મહાશક્તિર્મહેશ્વરી ।
મહાદેવી મહાકાલી મહાલક્ષ્મીઃ સરસ્વતી ॥
મહાવીરા મહારાત્રિઃ કાલરાત્રિશ્ચ કાલિકા ।
સિદ્ધવિદ્યા રામમાતા શિવા શાન્તા ઋષિપ્રિયા ॥
નારાયણી જગન્માતા જગદ્બીજા જગત્પ્રભા ।
ચન્દ્રિકા ચન્દ્રચૂડા ચ ચન્દ્રાયુધધરાશુભા ॥
ભ્રમરામ્બા તથાનન્દા રેણુકા મૃત્યુનાશિની ।
દુર્ગમા દુર્લભા ગૌરી દુર્ગા ભર્ગકુટુમ્બિની ॥
કાત્યાયની મહામાતા રુદ્રાણી ચામ્બિકા સતી ।
કલ્પવૃક્ષા કામધેનુઃ ચિન્તામણિરૂપધારિણી ॥
સિદ્ધાચલવાસિની ચ સિદ્ધવૃન્દસુશોભિની ।
જ્વાલામુખી જ્વલત્કાન્તા જ્વાલાપ્રજ્વલરૂપિણી ॥
અજા પિનાકિની ભદ્રા વિજયા વિજયોત્સવા ।
કુષ્ઠરોગહરા દીપ્તા દુષ્ટાસુરગર્વમર્દિની ॥
સિદ્ધિદા બુદ્ધિદા શુદ્ધા નિત્યાનિત્યતપઃપ્રિયા ।
નિરાધારા નિરાકારા નિર્માયા ચ શુભપ્રદા ॥
અપર્ણા ચાન્નપૂર્ણા ચ પૂર્ણચન્દ્રનિભાનના ।
કૃપાકરા ખડ્ગહસ્તા  છિન્નહસ્તા ચિદમ્બરા ॥
ચામુણ્ડી ચણ્ડિકાનન્તા રત્નાભરણભૂષિતા ।
વિશાલાક્ષી ચ કામાક્ષી મીનાક્ષી મોક્ષદાયિની ॥
સાવિત્રી ચૈવ સૌમિત્રી સુધા સદ્ભક્તરક્ષિણી ।
શાન્તિશ્ચ શાન્ત્યતીતા ચ શાન્તાતીતતરા તથા ॥
જમદગ્નિતમોહન્ત્રી ધર્માર્થકામમોક્ષદા ।
કામદા કામજનની માતૃકા સૂર્યકાન્તિની ॥

મન્ત્રસિદ્ધિર્મહાતેજા માતૃમણ્ડલવલ્લભા ।
લોકપ્રિયા રેણુતનયા ભવાની રૌદ્રરૂપિણી ॥

તુષ્ટિદા પુષ્ટિદા ચૈવ શામ્ભવી સર્વમઙ્ગલા ।
એતદષ્ટોત્તરશત નામસ્તોત્રં પઠેત્ સદા ॥

સર્વં સમ્પત્કરં દિવ્યં સર્વાભીષ્ટફલપ્રદમ્ ।
અષ્ટસિદ્ધિયુતં ચૈવ સર્વપાપનિવારણમ્ ॥

દિગ્બન્ધન શાન્તિમન્ત્રાઃ
ઇન્દ્રાદિ દિગ્પાલકાઃ સ્વસ્થસ્થાનેષુ સ્થિરી ભવન્તુ ।

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

ઇતિ શ્રી શાણ્ડિલ્યમહર્ષિવિરચિતા
શ્રીરેણુકાદેવ્યષ્ટોત્તરશતનામાવલિઃ સમ્પૂર્ણા ।

Encoded and proofread by Kaushal S. Kaloo kaushalskaloo at gmail.com

.. Sri Renuka Ashtottarashatanama Stotram ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*